International Journal of Sanskrit Research 2017; 3(2): 71-72

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(2): 71-72
© 2017 IJSR
www.anantaajournal.com
Received: 16-01-2017
Accepted: 17-02-2017

**डॉ. दोलामणिः आर्यः**
सहायक–प्राध्यापक, लक्ष्मीबाई महाविद्यालय, दिल्ली विश्वविद्यालय,, दिल्ली, भारत

**Correspondence**
**डॉ. दोलामणिः आर्यः**
सहायक–प्राध्यापक, लक्ष्मीबाई महाविद्यालय, दिल्ली विश्वविद्यालय,, दिल्ली, भारत

# उणादिसूत्राणां प्रवक्तृत्वं व्याख्यातारश्च

## डॉ. दोलामणिः आर्यः

**प्रस्तावना**

वस्तुतो वेदाङ्गानां प्रवृत्तिः मूलरूपेण वेदानां स्वरूपार्थयोः संरक्षणार्थं समजायत इति तद्विदः। तत्राङ्गशब्दस्योपकारपरत्वाद् वेदार्थावधारणे वेदाङ्गानां साक्षादुपकारित्वम्। पदपदार्थावगमनहेतुत्वाद् व्याकरणस्य प्राधान्यं सर्वैरप्यभ्यनुज्ञायते। परम्पराविद्भिराचार्यैः व्याकरणशास्त्राणि त्रिधा भिद्यन्ते– प्रातिशाख्याख्यानि छान्दसानि, कातन्त्रादीनि लौकिकानि, लौकिकवैदिकोभयविधत्वात् पाणिन्यादीनि च। 'सर्वपारिषदं हीदं शास्त्रम्' इति भाष्यवचनात् सम्प्रति पाणिनीयतन्त्रमेव वेदाङ्गपदेनावगम्यते। अनन्तशब्दराशिसंग्रहणाय सुमहच्छब्दानुशासनमपि न सर्वथा क्षम इति शब्दानुशासनस्य खिलपाठानां महत्त्वपूर्णं स्थानम्।

**व्याकरणस्य वेदाङ्गत्वम्ः** प्रथमस्तावद् वेदाङ्गानां साक्षादुल्लेखो मुण्डकोपनिषदि समुपलभ्यते – 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।' वेदाङ्गे व्यवह्रिमाणस्य अङ्गशब्दस्योपकारकपरकत्वाद् वेदार्थावगतौ तेषां सासादुपकारित्वम् यतो हि व्याकरणं नाम वेदाङ्गं प्रकृति प्रत्ययादीनां विश्लेषणपूर्वकं शब्दसाधुत्वप्रतिपादनपरकं शास्त्रम्। व्याकरणेन च क्लिष्टप्रक्रियाम् आश्रित्य शब्दोऽवबोध्यते। अत एव षट्स्वपि वेदाङ्गेषु व्याकरणस्य प्राधान्यं स्वीक्रियते। वाक्यवाक्यार्थयोरवधारणं पदपदार्थाधीनम्, पदपदार्थावगमश्च नास्ति व्याकरणादृते इति पारोवर्यविदः। तथा चादुर्भाष्यकाराः – 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। प्रधानं च षट्स्वङ्गेषु व्याकरणम्' इति। प्रातिशाख्यानि पुनः चरण विशेषस्य वर्णोच्चारणस्वरसन्धिपदपाठादिनियमप्रतिपादकपराणीति वस्तुतस्तु न तानि व्याकरणानि तेषां पदपदार्थावगमनेऽनिमित्तत्वात्। शिक्षावेदाङ्गे च तेषां अन्तर्भावः। कातन्त्रादीनां लौकिकमात्रत्वाद् वेदाङ्गस्य प्रश्न एव निरस्तः। तेषाम् निरस्तः। अधुना खलु पाणिनीयं तन्त्रम् एव उभयविधत्वाद्–

**व्याकरणस्य पंचाङ्गत्वम्**

संस्कृतभाषायामुपलब्धानि परिज्ञातानि वा समस्तानि व्याकरणशास्त्राणि प्रायशः पंचाङ्गैर्विभक्तानि। अत एव वैयाकरण–निकायेषु व्याकरणस्य कात्स्न्र्यद्योतनाय पंचाङ्ग व्याकरणमिति व्यवहारो दरीदृश्यते। पुरा धातुपाठादयोऽपि शब्दानुशासनस्य तत्तत्सम्बद्धप्रकरणेष्वन्तर्भूताः। उत्तरत्र च ग्राहकाणां धारणा शक्तेरायुषश्चापक्षयणात् प्रधानभूतशब्दानुशासनस्य लाघववशाच्च सूत्रपाठैर्वियुक्ता इति पुराविदः। सम्प्रदायविद्भिराचार्यैवैयाकरणैर्मतमिदं यत्– पाणिनिनापि स्वशब्दानुशासनसम्बद्धानि अङ्गानि प्रपंचितानि। तानि च सम्प्रति समुपलभ्यन्त एव। व्याकरणस्य पंचाङ्गानि सन्तिशब्दानुशासनम् (सूत्रपाठः), धातुपाठः, गणपाठः (प्रातिपदिकपाठः), उणादिपाठः लिङ्गानुशासनंच। पंचाङ्गेषु शब्दानुशासनं मुख्यमन्यानि चाङ्गानि शब्दानुशासनस्य उपकारकत्वाद् गौणानि। अतो धातुपाठादयः शब्दानुशासनस्य खिलरूपेण गण्यन्त इति।

**उणादिसूत्राणां प्रवक्तृत्वम्ः** अनन्तशब्दसंग्रहणाय शब्दानुशासनं न सर्वथा क्षम इति तस्य निदर्शनार्थत्वं सर्वैरपि स्वीक्रियते। नैगमरूढिशब्दावगमने चोणादिसूत्राणामुपादेयत्वात्तेषां स्वल्पकायत्वात् प्रकृतिप्रत्ययविभागस्य निदर्शकमात्रत्वम्। अत एव 'उणादयो बहुलम्' इति सूत्रेणाचार्येण ते प्रत्ययाः बहुलपदेन संकेतिताः। यतो हि उणादिप्रत्ययाः समासतोऽल्पप्रकृतिभ्यो विहिताः, प्रत्यया अपि प्रायेण समुच्चिताः प्रकृतिप्रत्ययविकारजन्यकार्याण्यपि च न निश्शेषतया समुपस्थापितानि। तथा च भाष्यकाराः –

बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायः समुच्चयनादपि तेषाम्।
कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु।।
नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्।।
संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु।।

उपलब्धेषूणादिसूत्रेषु पंचपाद्युणादिदशपाद्युणादिसूत्रापि सर्वप्राचीनतमानि। पाणिनीयपरम्परायामुभावपि समादृतानि। दीक्षितः स्वकौमुद्यां पंचपाद्युणादिसूत्राणां प्रक्रियाकौमुदीव्याख्याकारो विट्ठलश्च दशपाद्युणादि सूत्राणां व्याख्यानं चक्रतुः। पंचपाद्युणादि वृत्तेः प्रवक्तृत्वविषयकमतद्वयं वैयाकरणेषु श्रूयते। कतिपयैरर्वाचीनैः वैयाकरणैः भाष्यनिर्दिष्टवाक्यं "व्याकरणे शकटस्य च तोकम्" आश्रित्य पंचपाद्युणादिपाठस्य प्रवक्ता शाकटायन इत्याहुः। यथा – 'उणादय इत्येव सूत्रमुणादीनां शास्त्रान्तरपठितानां साधुत्वज्ञापनार्थमस्त्विति भावः' इति कैयटः। श्वेतवनवास्यपि– 'येयं शाकटायनादिभिः पंचपादी रचिता।' अत्र नागेश– 'एवं च कृवापेति उणादिसूत्राणि शाकटायनस्येति सूचितम्।' बालमनोरमायां वासुदेव आह– तानि चेमानि सूत्राणि शाकटायन मुनिप्रणीतानि, न तु पाणिनिना प्रणीतानि। अपरे पुनः पंचपाद्युणादिसूत्राणि पाणिनीयान्येवाहुः। प्रक्रियासर्वस्वकारो नारायणभट्टः उणादिप्रकरणे लिखति–

अकार मुकुरस्यादौ उकारं दर्दुरस्य च।
बभाण पाणिनिस्तौ तु व्यत्येयेनाह भोजराट्।।

उणादि सूत्राणां ख्यातो व्याख्याता स्वामी दयानन्दोऽपि सूत्राणामेषां रचयिता पाणिनिरेवेति मन्यते। सर्वमिदं मीमांसकपादैः संस्कृत कारणशास्त्रस्येतिहासाख्ये आकरे ग्रन्थे प्रपंचितानि।[1]

**पंचपाद्युणादिसूत्राणां व्याख्यातृत्वम्:** पंचषाद्युणादेर्निरीक्षणेन द्विधा शैली परिलक्ष्यते। एका तु पूर्वपादस्थस्यान्त्यप्रत्यय उत्तरपादस्यादिनः प्रत्ययश्च भिन्नः। यथा – प्रथमपादान्ते 'कनिन्' (उणा० 1.156), द्वितीयपादारम्भे च 'एणुः' (उणा० 2.1)। एवं चतुर्थपादान्ते 'कनसि' (उणा० 4.238), पंचमपादादौ च 'डुतच्'। द्वितीयाशैली– द्वितीयपादान्ते श्रूयमाणः 'ष्वरच्' (उणा० 2.123), तृतीयपादारम्भेऽपि। एवं च तृतीयपादस्यान्ते 'ई' (उणा० 3.138) स एव च प्रत्ययश्चतुर्थपादारम्भेऽपि। सर्वमेतत् समीक्ष्य मीमांसकपादाः स्वग्रन्थरत्ने पंचपाद्युणादेस्त्रिधा पाठम् आतिष्ठन्तेप्राच्यपाठः, औदीच्यपाठः दाक्षिणात्यपाठश्च।[2] पंचपाद्युणादिसूत्राणां व्याख्या अनेकैः आचार्यैः व्याख्याता ते च सन्ति –

**भाष्यकृत्:** अनिर्ज्ञातकालनामा कश्चिद् वैयाकरणः पंचपाद्या उणादिसूत्राणां भाष्यकार आसीदिति स्थलद्वये स्वोणादिवृत्तौ उज्ज्वलदत्तेनोद्धृतः – 'इगुपधात् किरिति प्रमादः पाठः। स्वरे विशेषादिति भाष्यम्।'[3] एवं 'इहेक इति वक्तव्येऽच इति वचनं सन्ध्यक्षरादप्याचारक्विबन्ताद्यथा स्यादिति भाष्यम्।'

**गोवर्धनः** बंगनृपतेर्लक्ष्मणसेनस्य सभ्योऽयं वैयाकरणो विक्रमसंवत्सरस्य द्वादश्याः शताब्द्याः प्रारम्भे उणादिवृत्तिं रचयामासेति मीमांसकाः। अस्या उद्धरणानि अमरटीकासर्वस्वे उज्ज्वलवृत्तौ प्रौढमनोरमादिषु च सम्प्राप्यन्ते।

**दामोदर:** वैक्रमाब्दस्य द्वादशशतकात् पूर्वं लब्धजन्मा दामादरो नामको वैयाकरणोप्युणादिसूत्राणां वृत्तिकृदासीदिति।

**पुरुषोत्तमदेवः** विक्रमसंवत्सरस्य द्वादश्यां शताब्द्यां प्रादुर्भूतोऽयं वैयाकरणः उणादि पाठस्य वृत्यात्मकं व्याख्यानं रचितवान् इति मीमांसकाः। अस्या वृत्तेरुद्धरणानि देववृत्तिनाम्ना उज्ज्वलवृत्तौ प्राप्यन्ते– "शकिसहोश्च इति चकारस्यानुक्तसमुच्चयार्थत्वात्साधयन्तीति देवः।"[4] दुर्घटेऽपि वृत्तिरीयं सूच्यते।

**सूतीवृत्तिकारः** वैक्रमाब्दस्य द्वादशशताब्द्यां कश्चित् सूत्याख्यो वा वैयाकरणः पंचपाद्युणादिसूत्राणां वृत्तिव्याख्यानं प्रपंचितवान् इति उज्ज्वलवृत्तौ परिज्ञायते – 'सूत्रमिदं सूतीवृत्तौ देववृत्तौ च न दृश्यते।'[5]

**उज्ज्वलदत्तः** वैक्रमाब्दस्य त्रयोदश्याः शताब्द्याः प्रारम्भे बंगेशीयो लब्धप्रतिष्ठो महावैयाकरणो जाजलीत्पपरनामधेय उज्ज्वलदत्तः पञ्चपाद्युणादि सूत्राणां वृत्तिरुदाहरणपुरस्सरं सुमहत् सर्वांगपूर्णं व्याख्यानं प्रस्तुतवान् शब्दविदो समक्षे। प्रायेण उत्तरवर्त्तिन उणादिवृत्तिकाराः उज्ज्वलदत्तस्य आश्रयणं स्वीकृतवन्त इति उणादितत्त्वविशारदाः।
अन्येऽपि वृत्तिकारा ये उणादिसूत्राणां व्याख्यानं कृतवन्तस्ते सन्ति– विद्याशीलः, श्वेतवनवासी, भट्टोजिदीक्षितः, नारायणभट्टः, महादेव वेदान्ती, रामचन्द्रदीक्षितः, वेङ्कटेश्वरः, पेरुसूरिः, नारायण सुधी, शिवरामः, रामशर्मा स्वामी दयानन्द सरस्वती च। अज्ञातनामानः केचदन्येऽपि वैयाकरणा उणादिसूत्राणां व्याख्यानं कारपांचक्रिरे इति मीमासकः।[6]

**सन्दर्भ ग्रन्थ**

1. स०व्या०शा०इति०, भाग–2, पृ० 209–10
2. स०व्या०शा०इति०, भाग–2, पृ० 216–217
3. उज्ज्वलदत्तः, उणा० 4.119, 4.138
4. उज्ज्वदत्तः, उणा० 4.109
5. उज्ज्वलदत्तः, उणा० 3.140
6. सं०व्या०शा०इति०, भाग–2, पृ० 244